द्वित्र्योश्च धमुञ्। (४७/१९९१)

[1]धा इत्यनुवर्तते। द्वित्र्योः सम्बन्धिनो धाप्रत्ययस्य विधार्थे अधिकरणविचाले च विहितस्य धमुञादेशो भवति अन्यतरस्याम्। चकारो विकल्पा[2]नुकर्षणार्थः। द्विधा, द्वैधम्। त्रिधा, त्रैधम्।

[६१०] धमुञन्तात् स्वार्थे डदर्शनम्। (म.भा. २.४११)

[3]मतिद्वैधानि [4]संश्रयन्ते। [5]मतित्रैधानि [6]संश्रयन्ते॥

एधाच्च। (४६/१९९२)

द्वित्र्योः सम्बन्धिनो धाप्रत्ययस्य एधाच् आदेशो भवत्यन्यतरस्याम्। चकारो विकल्पा[7]नुकर्षणार्थः। द्वेधा, द्वैधम्, [8]द्विधा। त्रेधा, त्रैधम्, [9]त्रिधा॥

याप्ये पाशप्। (४७/१९९३)

याप्यः कुत्सितः इति उच्यते। याप्ये[10] वर्तमानात् प्रातिपदिकात् [11]स्वार्थे पाशप् प्रत्ययो भवति[12]। याप्यो वैयाकरणः, कुत्सितो वैयाकरणः वैयाकरणपाशः। याज्ञिकपाशः[13]।

यो व्याकरणशास्त्रे प्रवीणो [14]दुःशीलः, तत्र कस्मान् न भवति? यस्य[15] गुणस्य [16]सद्भावाद् द्रव्ये शब्दनिवेशः, तस्य कुत्सायां प्रत्ययः॥

पूरणाद् भागे तीयादन्। (४८/१९९४)

पूरणप्रत्ययो यस्तीयः, तदन्तात् प्रातिपदिकाद् भागे वर्तमानात् स्वार्थे [17]अन् प्रत्ययो भवति। स्वरार्थं वचनम्। द्वितीयो भागः द्वितीयः। तृतीयः। भागे इति किम्? [18]द्वितीयम्। तृतीयम्[19]। [20]पूरणग्रहण-मुत्तरार्थम्, न ह्यपूरणस्तीयोऽस्ति। मुखतीयादिरनर्थकः॥

प्रागेकादशभ्योऽच्छन्दसि। (४९/१९९५)

पूरणाद् भागे इत्येव। प्रागेकादशभ्यः सङ्ख्या[21]शब्देभ्यः पूरणप्रत्ययान्तेभ्यः भागे वर्तमानेभ्यः स्वार्थेऽन् प्रत्ययो भवति अच्छन्दसि विषये। स्वरार्थं वचनम्। पञ्चमः[22]। सप्तमः[23]। [24]नवमः। [25]दशमः। प्रागेकादशभ्यः इति किम्? एकादशः। द्वादशः। अच्छन्दसि इति किम्? 'तस्य पञ्चममिन्द्रियस्यापाक्रामत्[26]' (मै.सं. १.९.४)॥

---

1. धः इति क. 2. अनुकरणार्थः क. 3, 5. पथि ब. ड. फ. ग. 4, 6. संश्रयन्ते नास्ति क. ह. 7. अनुकरणार्थः क. 8. द्विधा नास्ति ड.ह. 9. त्रिधा नास्ति ड.ह. 10. अर्थे इत्यधिकम् ब.क.फ. 11. स्वार्थे नास्ति क. 12. पकारः स्वरार्थः इत्यधिकम् क. 13. छन्दस्पाशः इत्यधिकम् ब.ड.फ.ह. 14. स्वयं इत्यधिकम् ड. 15. हि इत्यधिकम् ब. क. 16. भावात् ब, स्वभावात् क, तद्भावात् ड. 17. भागे इत्यधिकम् ह. 18. द्वितीयः तृतीयः क. 19. भोजनम् इत्यधिकम् ड.फ. 20. पूरणम् ह. 21. वाचिभ्यः ड.फ.ग.ह, संख्या-शब्देभ्यः नास्ति क. 22–23. भागः इत्यधिकम् क. 24–25. नास्ति क. 26. अपक्रमभाग इत्येव पञ्चमम् इत्यधिकम् क.